# Ishvaraproktam 4 Shivarchanopadesham

# ईश्वरप्रोक्तं ४ शिवार्चनोपदेशम्

## Document Information

Text title : Ishvaraproktam 4 Shivarchanopadesham

File name : IshvaraproktaM4shivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 47 | 7-70||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2024

*sanskritdocuments.org*

# ईश्वरप्रोक्तं ४ शिवार्चनोपदेशम्

(शिवरहस्यान्तर्गते महादेवाख्ये)

- शिवपार्वतीसंवादे -

श्रद्धया सकृदेवापि समभ्यर्च्य महेश्वरम् ।
गायत्र्या च समभ्यर्च्य सोमस्थानमवाप्नुयात् ॥ ७॥

पञ्चाक्षरेणाभिपूज्य रुद्रलोके वसेन्नरः ।
कल्पमेकं दिव्यदेहः शिवरूपेण सङ्गतः ॥ ८॥

पञ्चभिर्ब्रह्मभिः पूज्य शिवं शिवगणो भवेत् ।
संशोध्य च शुभं लिङ्गं हेमपीठं शुभोदकैः ॥ ९॥

अद्भिः पूते तथा पीठे लिङ्गे चावाह्य शङ्करम् ।
दृष्ट्वा देवं तथा लिङ्गे सुपुष्पं मस्तके क्षिपेत् ॥ १०॥

कल्पिते चासने तत्र निर्माल्यमपनोद्य च ।
पाद्यमाचमनं चार्घ्यं दत्वा रुद्राय शम्भवे ॥ ११॥

स्नापयेद्गन्धतोयेन पाटलीमिश्रितेन च ।
क्षीरेण च गवां नित्यं घृतेन च सुगन्धिना ॥ १२॥

दध्ना च मधुना चैव कीटहीनेन शङ्करि ।
ऐक्षव्या सितया चापि स्नापयेद्देवमीश्वरम् ॥ १३॥

नारिकेलोदकैः स्नाप्य मोचाम्ररकसुपानसैः ।
जम्बीरसारैर्गन्धोदैः कुशपुष्पहिरण्यजैः ॥ १४॥

अखण्डनीरधाराभिः स्नापयेत्परमेश्वरम् ।
रुद्रेण चमकेनैव तथा पौरुषसूक्तकैः ॥ १५॥

कद्रुद्रैः पवमानैश्च वामदेवादिसामभिः ।
रथन्तरैस्तथा रौद्रैः शिवेऽथर्वशिखादिभिः ॥ १६॥

स्नापयेद्देवदेवेशं तर्पयेदष्टनामभिः ।
शुद्धवस्त्रेण सम्मृज्य पीठे स्थाप्य महेश्वरम् ॥ १७॥

भस्मना चन्दनाद्यैश्च लेपयेत्साक्षतादिभिः ।
रोचनाद्यैश्च सम्पूज्य चन्द्रैश्चैव महेश्वरम् ॥ १८॥

बिल्वपत्रैरखण्डैश्च दूर्वापामार्गदर्भकैः ।
नीलोत्पलैस्तथा पद्मैर्नन्द्यावर्तशिरीषकैः ॥ १९॥

मल्लिकाचम्पकैर्जाजीवकुलार्कशमीसुमैः ।
करवीरैश्च कुटजैः पाटलैर्द्रोणसम्भवैः ॥ २०॥

केतकी बृहतीपुष्पैः पुष्पैरारग्वधोद्भवैः ।
पूजयेन्नामभिर्देवि निधनेत्यादिभिः शिवे ॥ २१॥

दत्वा पञ्चविधं धूपं तगजागरुकेसरम् ।
देवद्रुसद्धजैर्बैल्वगुग्गुलं सधृतं शिवे ॥ २२॥

दीपान् प्रज्वाल्य घृतजान् पायसं च निवेदयेत् ।
दधिभक्तं च मध्वाज्यपरिप्लुतमुमापतेः ॥ २३॥

शुद्धान्नं चैव मुद्गान्नं माषान्नं च निवेदयेत् ।
माषापूपं गुडापूपं गोधूमापूपमेव च ॥ २४॥

खेजिका लड्डुकाष्चैव मोदकाः फेणिकाः शिवे ।
मण्डकाभक्ष्यभोज्यं च निवेद्यं स्यात्सदा शिवे ॥ २५॥

शाकसूपादिदध्यन्नं गुडान्नं विनिवेदयेत् ।
क्रमेणैव फलैः श्रेष्ठैः पानकैर्मजिकां तथा ॥ २६॥

ताम्बूलमथ गन्धाढ्यं सकलं विनिवेदयेत् ।
नीराजयेत्ततो दीपैः शतसाहस्रवर्तिकम् ॥ २७॥

वृषकुम्भगजाकारं नागमानुषरूपकम् ।
नाक्षत्रं दीपकं दत्वा सद्योजातादिपञ्चकैः ॥ २८॥

पञ्चपात्रेषु देयं स्यात्ततः कर्पूरखण्डजम् ।
रक्षाबन्धं ततः कुर्याद्भस्मना त्रिः क्रमेण तु ॥ २८९॥

ऋक्सामयाजुषाथर्वमन्त्रैःस्तुत्वा महेश्वरम् ।

पौराणैर्वा तथा वाक्यैः स्तुवीत परमेश्वरम् ॥ ३० ॥

ईशानं पुरुषं चैवमघोरं वाममेव च ।
सद्योजातं जपेत्पश्चात्पञ्चभिः पूजयेच्छिवम् ॥ ३१ ॥

छत्रं च चामरे दिव्ये व्यजनादर्शकध्वजम् ।
वीणावेणुमृदङ्गादीन् शङ्खदुन्दुभिकाहलम् ॥ ३२ ॥

चार्मं तन्त्रीमयं श्रेष्ठं तथैव च मुखोद्भवम् ।
वाद्यं च श्रेष्ठमित्याहुः शिवार्चासु महेश्वरि ॥ ३३ ॥

अलाभे सर्ववाद्यानां घण्टाघोषः प्रशस्यते ।
रत्नस्वर्णोद्भवं पात्रं राजतं ताम्रजं तथा ॥ ३४ ॥

कांस्यपैत्तलसम्भूतं दारवं चाश्मसम्भवम् ।
शौक्तिकं पत्रसम्भूतं मृन्मयं वाप्यलाभतः ॥ ३५ ॥

कल्पयेच्छिवपूजायां फलं स्यादुत्तरोत्तरम् ।
पञ्चामृतं चान्यगवां कापिलं स्यात्ततोऽधिकम् ॥ ३६ ॥

नारिकेलं तथैवान्यत् श्वेतं तत्र प्रशस्यते ।
रम्भाः सुवृत्तपीताच्छाः प्रशस्तास्त्वभिषेचने ॥ ३७ ॥

इक्षुभ्यः पौण्ड्रकं चेक्षु प्रशस्तं स्नपने शिवे ।
गुलवल्मीकसम्भूतान्मधु पार्वतमुत्तमम् ॥ ३८ ॥

कृष्णं निषिद्धं देवेशि पैतृके विनियोजयेत् ।
ताटाकात्कूप्यमुत्कृष्टं ततः कुल्योद्भवं शिवे ॥ ३९ ॥

ततो नदीभवं पुण्यं सागराभिमुखासु च ।
शङ्खोदकं ततोत्कृष्टं सर्वपात्रजलैरपि ॥ ४० ॥

सर्वतैलैरपि शिवे तिलजं श्रेष्ठमुच्यते ।
प्रहरं तिष्ठते जाती दिवारात्रौ च मल्लिका ॥ ४१ ॥

पद्मं नीलोत्पलं चैव मुकुलं वा दिनत्रयम् ।
न पर्युषितदोषोऽस्ति बिल्वपत्रे शिवप्रिये ॥ ४२ ॥

न पर्युषितदोषोऽस्ति हैमे रत्नोपकल्पिते ।
अलाभे बिल्वपत्राणां निर्माल्यैः क्षालितैर्यजेत् ॥ ४३ ॥

पुष्पाणामप्यलाभे तु तत्पत्राणि निवेदयेत् ।
कुटजैर्नार्चयेदीशं यस्य कस्य सुमस्य च ॥ ४४॥

विना नीलोत्पलं देवि साम्बं मन्दारकैर्यजेत् ।
मल्लिकाभिर्जातिकाभिः प्रातश्चम्पकनन्दिकैः ॥ ४५॥

मध्याह्ने कर्णिकारैश्च करवीरैश्चपाटलैः ।
पुन्नागैः पारिजातैश्च पुष्पैरन्यैर्यथाबलम् ॥ ४६॥

कनकं केतकीपुष्पं निशि कादम्बजैर्यजेत् ।
सर्वदा बिल्वपत्रं मे प्रियं शैलेन्द्रकन्यके ॥ ४७॥

बिल्वपत्रे च कमले कमला सुप्रतिष्ठता ।
नीलोत्पलेऽम्बिका साक्षात् अल्लकेरक्तसन्धितः ॥ ४८॥

पुण्डरीके महादेवो गणेशः शतपत्रके ।
कर्णिकारे स्थितो वेधा मल्लिकासु हरिः स्थितः ॥ ४९॥

कर्णिकारे स्थितो नन्दी दुर्गा पाटलकेषु च ।
श्वेतार्के चैव चण्डीश पुष्पेषु गणपाः स्थिताः ॥ ५०॥

यमो नीलेषु पुष्पेषु रक्तेऽपर्णा प्रतिष्ठिता ।
श्वभ्रपुष्पार्चने मुक्तिर्भुक्तिरत्र समर्चने ॥ ५१॥

पीतं वश्यकरं देवि नीलकं मारणे भवेत् ।
अनेन विधिना देवः प्रसीदति महेश्वरः ॥ ५२॥

कृष्णागरूद्भवं धूपं सर्वपापनिकृन्तनम् ।
साम्राणिजं गुग्गुलुजं धूपं वश्यकरं भवेत् ॥ ५३॥

सर्वरोगहरं बैल्वं सघृतं धूपमुत्तमम् ।
मारणोच्चाटने नैव धूपो दीपोऽपि सत्तमे ॥ ५४॥

कौसुम्भतैलं वश्यं स्यात् शिवदीपप्रदानतः ।
सार्षपं रोगनाशाय माधूकं राजवश्यकम् ॥ ५५॥

नारीकेलोद्भवं तैलं स्त्रीवशीकरणं शिवे ।
नीलतैलं ज्ञानदायि शिवाग्रे दीपदापने ॥ ५६॥

हैरण्डे बुद्धिमान्द्यं स्यात् शिवाग्रे दीपदानतः ।
गव्यमाज्यं मुक्तिदायि माहिषं पुष्टिकृद्भवेत् ॥ ५७॥

एवं धूपादिदीपेषु पुष्पेषु फलमम्बिके ।
यथालाभं प्रकुर्वीत तानयुक्तो न दुष्यति ॥ ५८॥

वृक्षाः पुष्पाणि पत्राद्यै वल्लयश्च महेश्वरि ।
उपयुक्त शिवार्चायां गावो या लोकमातरः ॥ ५९॥

गतिं प्रयान्ति परमां किम्पुनर्मानवाः शिवे ।
द्विजाः क्षत्रा विशः शूद्राः स्त्रियो वापि च शाङ्कराः ॥ ६०॥

शङ्करार्चासु निरताः प्रयान्ति परमं पदम् ।
पूजयेद्यः शिवं रुद्रं शर्वं शिवमजं सकृत् ॥ ६१॥

स याति शिवसायुज्यं त्रिः सप्तकुलसंयुतः ।
पूजितं वा महादेवं पूज्यमानमथापि वा ॥ ६२॥

दृष्ट्वा प्रयाति वै मर्त्यो रुद्रलोकं न संशयः ।
अर्चितं प्रातरीक्षेत लिङ्गं देवमुमापतिम् ॥ ६३॥

नैशपापं द्विमुच्येत मध्याह्ने हयमेधभाक् ।
सायं जन्मायुतोद्भूतं दृष्ट्वा तत्पापनाशकृत् ॥ ६४॥

निशीथे तु महादेवमभिवीक्ष्य विमुक्तिभाक् ।
दृष्ट्वा नत्वाभिगच्छेद्वा स याति गणतां मम ॥ ६५॥

स कृत्प्रसङ्गतो लिङ्गमनघः स्याद्धरस्य हि ।
दृष्ट्वा नत्वाभिगच्छेद्वा प्रादक्षिण्येन शङ्करि ॥ ६६॥

एकप्रदक्षिणं लिङ्गे चण्डेशादर्शनं तथा ।
अदीपदर्शनं चैव शिवस्यार्धनमस्क्रिया ॥ ६७॥

ब्राह्मणानां परीवादो हन्ति पुण्यं पुराकृतम् ॥

ईश्वरः उवाच ।

इत्येष ते समासेन फलाफलविनिर्णयः ॥ ६८॥

पुण्यं च दर्शनं शम्भोर्धूपदीपनिवेदने ।
कथितं प्रथितं देवि महितं शाम्भवं वरम् ॥ ६९॥

नानायोनिषु सञ्चरन् विधिवशाद्विप्रत्वमेत्यादरात्

वर्णित्वेऽखिलवेदजालकलनाद्दाराग्निहोत्रे रतः ।
अग्निष्टोममखादिभिः क्रतुवरैरिद्धेष्टिभिश्चान्तिमे
वानप्रस्थगतो विरज्य विषये त्यक्तेषणो मस्करी ॥ ७० ॥

॥ इति शिवरहस्यान्तर्गते ईश्वरप्रोक्तं ४ शिवार्चनोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । महादेवाख्यः एकादशमांशः । अध्यायः ४७ । ७-७० ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 47 . 7-70..

Notes:

Śivaशिव outlines the procedures for worshipping Him including those via the Śivaliṅga शिवलिङ्ग?; and mentions about the various Dravya द्रव्य for Abhiṣekam अभिषेकम्; Puṣpa पुष्प, Patra पत्र, Dhūpa धूप, Dīpataila दीपतैल, Naivedya नैवेद्य etc. for offering during Pūjā पूजा.

Several other procedures are mentioned throughout the 12 Aṁśa- s १२ अंशाः of the ŚivaRahasyam शिवरहस्यम्.

Selected Śloka-s from the chapter are given on this page.

Proofread by Ruma Dewan

*Ishvaraproktam 4 Shivarchanopadesham*
pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*